International Journal of Sanskrit Research 2016; 2(4): 26-29

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(4):26-29
© 2016 IJSR
www.anantaajournal.com
Received: 09-05-2016
Accepted: 10-06-2016

डॉ0 नन्दनकुमारतिवारी
अकादमिक एसोसिएटः,
ज्योतिषविभागे
उत्तराखण्डमुक्तविश्वविद्यालयः
हल्द्वानी, नैनीतालम्

**Correspondence**
डॉ0 नन्दनकुमारतिवारी
अकादमिक एसोसिएटः,
ज्योतिषविभागे
उत्तराखण्डमुक्तविश्वविद्यालयः
हल्द्वानी, नैनीतालम्

# वास्तुशास्त्रस्य परिचयः

## डॉ0 नन्दनकुमारतिवारी

भारतीयज्योतिषशास्त्रे संहितास्कन्धान्तर्गतं वास्तुशास्त्रं फलितज्योतिषशास्त्रस्य मुख्यविषयो वर्तते । वास्तुशास्त्रं स्थापत्यशास्त्रं वा शिल्पशास्त्रमपि कथ्यते । वास्तुविज्ञानं भारतीयज्ञानविज्ञानपरम्परायाः अन्यतमम् अङ्गम् वर्तते । अन्यशास्त्रवत् वास्तुशास्त्रस्योद्‌गमोऽपि वेदेभ्यो जातः । वेदेभ्य एवोपवेदाः उत्पन्नाः । वस्तुतः पृथिवी स्वप्राकृतिकरूपा वस्तुसंज्ञका सा इव निविष्टोपरि वास्तुसंज्ञका ज्ञेया। अर्थात् पृथिव्योपरि कोऽपि पार्थिवकृतिः 'वास्तु' वर्तते । नूनं भगवतः शिवः वास्तुपुरूषः । यथोक्तं यजुर्वेदस्यभागः रूद्राष्टाध्याये पंचमोऽध्यायस्य एकोनचत्वारिंशत् मन्त्रे –

**"नमोव्वात्याय च रेष्म्याच नमोव्वास्तव्व्यायच व्वास्तुपाय च नमः सोमाय च रूद्राय च नमस्ताम्राय चारूणाय च"[1] ।**

शतपथब्राह्मणेऽपि वास्तुपुरूषस्य महाकालः (रूद्रः) रूपमेव कथितम् ।

**व्युत्पत्तिः–**

व्याकरणशास्त्रस्यदृष्ट्या वस् निवासे धातोस्तुण्प्रत्यये सति वास्तु शब्दोऽयं निष्पद्यते । शीलति समादधाति इति शिल्पम् । शीलसमाधौ धातोः 'शिल्प' शब्दोऽयं निष्पद्यते ।

**प्रधानविषयाः–**

वास्तुस्कन्धे गृहनिर्माणं, जीर्णोद्धारः, प्रशस्तभूमिलक्षणः, काकिणी विचारः, ग्रामविचारः, दिशाविचारः, भूमेः शोधनम्, दिक्शोधनम्, शल्योद्धारविधिः, गेहमेलापकविचारः, गृहनक्षत्रकल्पनागृहराश्यानयनम्, अष्टकूटविचारः, पिण्डानयनम्, षोडशशाला भेदाः, आयादिसाधनम्, गृहायुनिर्माणं, मण्डलानयनं, तिथि–वार– लग्नानयनम्, पिण्डविचारः, गृहोपकरणविचारः, दुर्गनिर्माणं, गृहारम्भमुहूर्त्तः, गेहारम्भेमासविचारः, वृषभवास्तुचक्रम्, कूर्मचक्रम्, गजमुखपृष्ठलक्षणम्, लग्नशुद्धिः, गृहप्रवेशः चेत्यादिविषयाः प्रधानतया उपवर्णिताः भवन्ति ।

**प्रधानोपदेशकाः–**

मत्स्यपुराणानुसारेण वास्तुशास्त्रस्य अष्टादश उपदेशकाः सन्ति । यथोक्तम् –

**भृगुरत्रिर्वशिष्ठश्चविश्वकर्मा मयस्तथा ।**
**नारदो नग्नजिच्चैव विशालाक्षः पुरन्दरः ।।**
**ब्रह्माकुमारो नन्दीशः शौनको गर्ग एव च ।**
**वसुदेवोऽनिरूद्धश्च तथा शुकवृहस्पति ।।**
**अष्टादशैतेविख्याता वास्तुशास्त्रोपदेशकाः[2] ।**

अर्थात् भुगुः, अत्रिः, वशिष्ठः, विश्वकर्मा, मयः, नारदः, अनग्नजित्, विशालाक्षः, इन्द्रः, ब्रह्मा, कार्तिकः, नन्दीशः, शौनकः, गर्गः, श्रीकृष्णः, अनिरूद्धः, शुक्रः, वृहस्पतिः च एते वास्तुशास्त्रस्योपदेशकाः मन्यन्ते ।

**स्पष्टार्थबोधकचक्रम् –**




पुराणेषु प्रकृष्टं वास्तुविज्ञानं दृश्यते । ज्योतिषकल्पे च ततोऽप्यधिकं वास्तुवर्णनं प्राप्यते । अन्यच्च पुराणेषु तन्त्रेषु च ये वास्तुशास्त्राचार्याः वास्तुशास्त्रप्रवर्त्तकाः वा परिगण्यन्ते तेषु बहवो वैदिकर्षयः पुरातनाश्च शास्त्रप्रणेतारः सन्ति । वास्तुशिल्पशास्त्रीयग्रन्थेषु अग्निपुराणहयशीर्षपञ्चरात्रेषु आगमेषु च विलोक्यते तेनेदं विभावनीयं भवति यत् प्रासादस्थापत्यं दर्शनदृष्ट्यानुप्रणीतं पदे – पदे – प्रत्यक्षमनुभूयते ।

वास्तुशास्त्रं लोकोपकारकं वर्तते । यथा नेत्रयुक्त व्यक्तिः नेत्रहीनस्य मार्गदर्शनं करोति तथैव ज्योतिषशास्त्रमपि लोकस्य । विश्वस्य पुरातनेषु ग्रन्थेषु वेदस्यैव गणना भवति, भारतवर्षस्य च विश्वरचनायां ब्रह्मणः सृष्टेः प्रथमं स्थानं वर्तते । अतः भारतवर्षमेव समस्तविद्यानां चरमोन्नतेः गौरवं प्राप्तवान् इति विश्वख्यातेः पुरातत्त्ववेतृभिः मुक्तकण्ठेन स्वीकृतम् । वेदेषु पुराणेषु च गृह – धर्म्य – पस्ति – शालाभवन – आकार – सदन – निकेतन – प्रासाद – कुटीरादयः शब्दाः गूढ़ार्थे प्रयुक्ताः । अतः वैदिककाले गृहनिर्माणं निवासस्य प्रचलनमासीत् । यथा अथर्ववेदे – शरणा स्योना देवी शाला देवेभिर्निर्मितास्याग्रे तृणं वसाना समनाः । अन्तराश्रयार्थं सुखप्रदायकं तृणमयं गृहस्य उर्ध्वभागात्मकम् उत्तमविचारोपेतं रम्यं दिव्यं गृहं देवे निर्मितम् ।

जगद्धिताय वास्तुपुरूषस्योत्पत्तिः इति विश्वकर्मा स्वीकरोति भविष्यपुराणे । तत्र कृतयुगे महाभूतं समुद्भुतं येन स्वीयविपुलवपुषा सकलो ब्रह्माण्डः आच्छादितः । तं महाभूतं समवलोक्य सर्वे देवाः भयाकुलाः सन्तः विधातुः सकाशं गतवन्तः । यथोक्तम् –

**पुराकृत् युगे ह्यासीद् महद्भूतं समुत्थितम् ।**
**व्याप्यमानं शरीरेण सकलं भुवनं ततः।।**
**तद् दृष्ट्वा विस्मयं देवा गता सेन्द्रा भयावृताः ।**
**ततस्तेः क्रोधसन्तप्तैः गृहीत्वा तमथासुरम् ।।**
**विनिक्षिप्तमधोवक्त्रं स्थितास्तत्रैव ते सुराः ।**
**तमेव वास्तुपुरूषं ब्रह्मा कल्पितवान् स्वयम्[3] ।।**

विश्वकर्मप्रकाशे च –
भूतभावन भूतेश महद्भयमुपस्थितम् ।
क्व यास्यामः क्व गच्छेमः वयं लोकपितामहः ।।
ततः ब्रह्मणं तं महाबलं महासुरं स ब्रह्मदेवता अधोमुखं निक्षिप्तवान् । तमेव महाबलं ब्रह्मा वास्तुपुरूषं कल्पितवान् स्वयं ततः स वास्तुपुरूषः क्रोशमानः महाशब्दं कुर्वत् प्रोक्तवान् –भो प्रभो ! त्वया समस्तजगत् सृष्टं वर्तते, इमे देवाश्च मां निरापराधं भृशं पीडयन्ति इति । ततः प्रसन्नेन ब्रह्मणा ग्रामे, नगरे, दुर्गे, पतने, प्रासादे, जलोधानेषु च वास्तुपुरूषाय पूजाया विधानं कृतम् । अतः गृहारम्भे प्रवेशे महोत्सवे जीर्णोद्धारे शिलान्यासेषु च सदैव वास्तुपूजा कर्तव्या।

**नानाक्षतसमोपेतं वस्त्राऽलंकारसंयुतम् ।**
**ब्रह्मघोषेण वाद्येन गीतमङ्गलानि स्वनैः ।।**
**पायसं भोजयेद्विप्राणां होमन्तु मधुसर्पिषा ।**
**वास्तोष्पतेः प्रतीजानीहि मन्त्रेणानेन सर्वदा ।।**
**सूत्रपाते तथा कार्य्यमेवं स्तम्भोदये पुनः ।**
**द्वारवंशोच्छ्रये तद्वतप्रवेशसमये तथा[4] ।।**

समराङ्गणसूत्रधारो वास्तुशास्त्रीयपुराणमस्ति । तत्र सप्तमाध्याये वास्तुविद्यायाः व्यापकस्वरूपस्य विषयाणां पौराणिकावतारणा कृता वर्तते । वैदिकवाङ्मये वास्तुशास्त्रस्य अनेकस्थानेषु वर्णनमुपलभ्यते । विश्वस्य प्राचीनतमरचनायाम् ऋक्संहितायां वास्तोष्पतेः स्वरूपमनेन प्रकारेण प्रतिपादितमस्ति –

**''ऊँ वास्तोष्पतेः प्रतिजानीह्यस्मान्त्वावेषो अनमीवो भवा नः । यत् त्वेमहे प्रतितन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे।''**

वास्तुशास्त्रस्य विकसितस्वरूपस्य ज्ञानं वेदेषु मत्स्यपुराणे, वराहपुराणे, ब्रह्मवैवर्तपुराणे, स्कन्धपुराणे, अग्निपुराणे, देवीभागवतपुराणे, गरूड़पुराणे, भविष्यपुराणे, विष्णुधर्मोत्तरपुराणे, श्रीमद्भागवतपुराणे, वाल्मीकीरामायणे एवं महाभारते च सम्यक्प्रकारेण समुपलभ्यते । वृहद्वास्तुमालायां वास्तुपुरूषस्य वर्णनं सम्यक्प्रकारेण प्रतिपादितमस्ति ।

गृहनिर्माणारम्भे सर्वप्रथमं शिलान्यासो भवति । आग्नेयकोणं सम्पूज्य प्रथमां शिलां संस्थाप्य सर्वाः शिलाः प्रदक्षिणाक्रमेण न्यस्यन्ते । यथोक्तं मत्स्यपुराणे –

**वास्तूपशमने तद्वद्वास्तुयज्ञस्तु पञ्चधा ।**
**ईशाने सूत्रपातः स्यादाग्नेये स्तम्भरोपणम् ।।**
**प्रदक्षिणा कुर्वीत वास्तोः पदविलेखनम् ।**
**तर्जनी मध्यमा तथाङ्गुष्ठस्तु दक्षिणे ।।**

तत् खननं कस्मिन् दिशि भवेत् एतदर्थं राहोर्मुखपुच्छविचारः क्रियते । अस्य विधिः वृहद्वास्तुमालायां प्राप्यते । राहोर्मुखपुच्छे कदापि खननं न करणीयम् । यस्मिन् भागे नागस्य शरीराङ्गानि न स्युः तस्मिन् भागे खननं शुभावहं भवति । देवालयनिर्माणे गृहारम्भे, तडागारम्भे वा नगरस्य मुख – पुच्छविषये कश्चन भेदो वर्तते ।

अस्य वास्तुशास्त्रस्य वैशिष्ट्यं वैदिकाकालादारभ्य पुराणेषु चापि सततपरिचर्चायामुपलभ्यते । साम्प्रतं वास्तुशास्त्रस्योपयोगिता गृहनिर्माणे पदे – पदे प्रत्यक्षं स्वीक्रियते ।

वास्तुपुरूषस्य स्थितिः ज्ञानम् –

**सवेदास्तिथयोर्द्विघ्ना नामाक्षर समन्विता ।**
**त्रिभिश्चैवहरेद्भागं शेषः पुरूष उच्यते ।।**
**एके च वसते स्वर्गे द्वाभ्यां पातालमेव च ।**

शून्ये तु मृत्युलोके स्यादितिपाराशरोऽब्रवीत् ।।
स्वर्गेवासे भवेल्लाभः पातालेषु श्रियः सदा ।
मृत्युलोके भवेन्मृत्युर्विचिन्त्य गृहमारभेत्[5] ।।

**सूत्रम् –**

तिथिसंख्याः + 4 × 2 = प्राप्त गुणनफलं + गृहेशस्य नामाक्षरसंख्याः
3

= शेषं क्रमेण यदि 1 आयाति तदा वास्तुपुरूषस्य स्थितिः स्वर्गे भवति । तत्फलं लाभः । यदि 2 आयाति तदा वास्तुपुरूषस्य स्थितिः पाताले भवति, अस्य फलं लक्ष्मीः प्राप्तिः । तथा च यदि शेषं 3 आयाति तदा वास्तुपुरूषस्य स्थितिः मृत्युलोके भवति, तत्फलं हानिमेव भवति। अयमेव अस्य विचाराः कृत्वा गृहारम्भः कूर्मः ।
सुविदितमेव गृहं मानवजीवनस्य मूलभूत अङ्गम् वर्तते । वास्तुशास्त्रे सर्वप्रमुख विषयः गृहनिर्माणम् । तत् हेतोः इदमेव निरूपितम् –

**स्त्रीपुत्रादिकभोगसौख्यजननं धर्मकामप्रदम् ।
जन्तूनामयनं सुखास्पदमिदं शीताम्बुधर्मावहम ।।
वापीदेवगृहादिपुण्यमखिलं गेहात्सपद्यते ।
गेहं पूर्वमुशन्ति तेन विबुधाः श्रीविश्वकर्मादयः[6] ।।**

अर्थात् गृहं विना स्त्रीपुत्रादि सौख्यं, भौतिकसुखं, पुरूषार्थः न प्राप्त कर्तुं शक्यते तथा च विभिन्नऋत्वेन (यथा – ग्रीष्मः, वर्षा, शरदादि) रक्षादि अपि न कर्तुं शक्यते । अतः उपर्युक्त कामनाय लाभाय च गृहनिर्माणं परमावश्यकम् ।

**गृहनिर्माणमहत्वम् –**

**कोटिघ्नं तृणजे पुण्यं मृण्मये दशसंगुणम् ।
इष्टिके शतकोटिघ्नं शैलेऽनन्तं फलं गृहे[7] ।।**

क्रमेण यदि तृणेन गृहनिर्माणं कृतं कोटिगुणं फलं, मृदेन कृतं दशगुणितं फलं, इष्टिकेन कृतं शतगुणितं फलं तथा स प्रस्तरेण यदि गृहनिर्माणं कृतं तर्हि अनन्तं फलं भवन्ति ।

**वर्गज्ञानम् –**

**वर्गाष्टकस्य पतयो गरूडो विडालः सिंहस्तथैव शुनकोरगमूषकैणाः ।
मेषः क्रमेण गदिताः खलु पूर्वतोऽपिः यः स रिपुरेव बुधैर्विवर्ज्यः[8] ।।**

अष्टवर्गाः भवन्ति । अवर्गः, कवर्गः, चवर्गः, टवर्गः, तवर्गः, पवर्गः, यवर्गः शवर्गाश्च । तथा च अवर्गादि अष्टवर्गानां क्रमेण गरूडः, विडालः, सिंहः, श्वानः, सर्पः, मूषकः, मृगः, तथा मेषश्च स्वामी भवन्ति । पूर्वादि अष्टदिशानामपि एते क्रमेण स्वामी सन्ति । स्ववर्गेण पंचमवर्गः शत्रु जायते । अतः विबुधैः तस्य त्याज्यं कृतम् ।

**स्पष्टार्थ चक्रम् –**

| अवर्गः 1 | कवर्गः 2 | चवर्गः 3 | टवर्गः 4 | तवर्गः 5 | पवर्गः 6 | यवर्गः 7 | शवर्गः 8 | **वर्गाः संख्याश्च** |
|---|---|---|---|---|---|---|---|---|
| पूर्व | अग्नि | दक्षिण | नैर्ऋत्य | पश्चिम | वायव्य | उत्तर | ईशान | **दिक्** |
| गरूड़ | विडाल | सिंह | श्वान | सर्प | मूषक | मृग | मेष | **स्वामीनां नामानि** |
| 8 | 5 | 6 | 4 | 7 | 1 | 3 | 2 | **स्वराङ्काः** |

**ग्रामवासे काकिणीविचारः–**

**स्ववर्गं द्विगुणं कृत्वा पर वर्गेण योजयेत् ।
अष्टभिस्तु हरेद्भागं योऽधिकः स ऋणी भवेत्[9] ।।**

**सूत्रम् –**

(स्वनामवर्गं × 2) ग्राम वर्ग संख्या = शेषम् काकिणी ।
8

यस्या काकिणी अधिका स्यात् सा द्वितीयेन लाभान्वितं भवति ।

**भूमिलक्षणम् –**

**सुगन्धा ब्राह्मणी भूमी रक्तगन्धा तु क्षत्रिया ।
मधुगन्धाभवेद्वैश्या मद्यगन्धा च शूद्रिका ।।**

**प्रशस्त भूमि–**

गजपृष्ठः –

**दक्षिणे पश्चिमे चैव नैर्ऋत्ये वायुकोणके ।
एभिरूच्चा यदा भूमिर्गजपृष्ठाऽभिधीयते ।।**

यस्य दक्षिण, पश्चिम, नैर्ऋत्य वायव्यश्च भागः उन्नतो जाता सा गजपृष्ठ भूमि भवति ।

**निवासफलम्–**

**गजपृष्ठे भवेद्वासः स लक्ष्मीधनपूरितः ।
आयुवृद्धिकरोनित्यं जायते नात्र संशयः ।।
गजपृष्ठ भूम्यां निवासेन धनायुष्य वृद्धिः भवति ।**

**कूर्मपृष्ठः–**

**मध्येऽत्युच्चं भवेद्यत्र नीचं चैव चतुर्दिशम् ।
कूर्मपृष्ठा भवेद्भूमिस्तत्र वासो विधीयते।।
कूर्मपृष्ठे भवेद्वासो नित्योत्साहसुखप्रदः ।
धनधान्यं भवेत्तस्य निश्चतं विपुलं धनम् ।।**

यस्य मध्यभागोन्नतं तथा च चतुर्दिशषु नतं सा कूर्मपृष्ठभूमिः भवति । कूर्मपृष्ठभूम्यां निवासेन भौतिक सुख – सम्पदादिनां परिपूर्णं भवति । तत्र दैत्य तथा नागपृष्ठभूमिलक्षणं अशुभं भवति । इमौ भूम्यौ अप्रशस्तौ। सा निवासयोग्यं न भवति ।

**दैर्घ्य – विस्तारयोरानयनम् –**

**एकोनितेष्टर्क्षहता द्वितिथ्यो रूपोनितेष्टायहतेन्दुनार्गः।
युक्ता घनैश्चापि युता विभक्ता भूपाश्विभिः शेषमितो हि पिण्डः।।
स्वेष्टायनक्षत्रभवोऽथ दैर्घ्यहृत्स्याद्विस्तृतिहृच्च दीर्घता।
आया ध्वजो धूमहरिश्वगोखरेभध्वाङ्क्षकाः पिण्ड इहाष्टशेषिते[10]।।**

इष्टर्क्षम् = इष्टनक्षत्रसंख्यां, एकोनितां = एकेनरहितां, द्वितिथ्यः = 152 संख्यया, हता = गुणिता, । इष्टायः = कल्पितेष्ट आयः ध्वजादिषु, रूपोनितः = एकेन रहितः, इन्दुनागैः = 81 एकाशीतिभिः, हतः = गुणितः, युक्ताः = द्वयोर्गुणनफलयोर्योगः कार्यः, घनैः = सप्तदशभिः, अपि युता = योगः कार्यः, योगफलं, भूपाश्विभिः = 216 एभिः, विभक्ता, शेषमितः = भक्तावशिष्टः, हि = निश्चयेन, स्वेष्टायनक्षत्रभवः = स्वकल्पितेष्टायनक्षत्रयोः सकाशादुत्पन्नः पिण्डः = वास्तोः पिण्डः भवति । दैर्घ्यहृत् स्यात् विस्तृतिः = कल्पितेन

दैर्घ्यमानेन पिण्डे विभक्ते सति लब्धं फलं विस्तारः, विस्तृतिह्यच्च दीर्घता = विस्तृतिमानेन विभक्ते सति दैर्घ्यः समायाति । इह = उक्तविधिना साधितः पिण्डः, अष्टशेषिते = अष्टभिर्भक्ते, शेषाङ्केन क्रमेण, ध्वजः, धूमः, हरिः = सिंहः, श्व = श्वानः, गो = वृषः, खरः = रासभः, इभः = हस्ती, ध्वांक्षः = काकः, एते आयाः भवन्ति ।

**सूत्रम्–**

अभीष्ट नक्षत्रस्य संख्या – 1 × 152 = प्रथम फलम् ..........समी0 1

पुनः अभीष्ट आयेन – 1 × 81 = द्वितीय फलम् .......... समी0 2

समी0 1 + समी0 02 + 17 = शेषम् ।

216

= इष्टायः तथा इष्टनक्षत्रोत्पन्न गृहस्य पिण्डः।

अभीष्टदैर्घ्येने पिण्डस्य विभक्तोपरि लब्धिः विस्तारः तथा विस्तारेण पिण्डस्य विभक्तोपरि दैर्घ्यम् भवति ।

पिण्ड/8 = एकादि शेषे क्रमेण 1 ध्वजः, 2 धूमः, 3 सिंहः, 4 श्वानः, 5 गौ, 6 खरः, 7 गजः, तथा 8 ध्वांक्ष संज्ञकाः भवन्ति ।

**गृहाणां नामानि–**

> **ध्रुवधान्ये जयनन्दौ खरकान्तमनोरमं सुमुख – दुर्मुखोग्रं च।**
> **रिपुदं वित्तद नाशे चाक्रन्दं विपुल विजयाख्यं स्यात्[11] ।।**

ध्रुवम, धान्यं, जय, नन्दं, खरं, कान्तं, मनोरमं, सुमुखं, दुर्मुखं, उग्रम्, रिपुदम्, वित्तदम्, नाशम्, आक्रन्दं, विपुलं, विजयं, इत्याख्यं गृहं स्यात्। एतानि गृहाणां षोडश नामानि सन्ति ।

**गृहारम्भे पंचांगशुद्धिः–**

> **भौमार्करिक्तामाद्यूने चरोनेऽङ्गे विपंचके ।**
> **व्यष्टान्त्यस्थैः शुभैर्गेहारम्भस्त्रयायारिगैः खलैः[12] ।।**

भौमः = भौमवासरः, अर्कः = रविवासरः, रिक्ता = 4,9,14 तिथयः, अमा = अमावास्या, आदिः, प्रतिपत्, ऊने = एभिरूने रहिते काले, चरोनेऽङ्गे = चरसंज्ञकैः 1,4,7,10 राशिभिर्विरहिते लग्ने, विपंचके = पंचकरहिते धनिष्ठादिरेवत्यन्तपंचनक्षत्राणि हित्वा, व्यष्टान्त्यस्थैः = अष्टम द्वादशभवनरहितैः, शुभैः = शुभग्रहैः, त्र्यायारिगैः = तृतीयैकादशषष्ठभवनगतैः, खलैः = अशुभग्रहैः, गेहारम्भः = गृहारम्भः शुभः स्यात् ।

**गृहारम्भे नक्षत्र वार – फलानि–**

> **पुष्यध्रुवेन्दुहरिसर्पजलैः सजीवै**
> **स्तद्वासरेण च कृतं सुतराज्यदं स्यात् ।**
> **द्वीशाश्वितक्षवसुपाशिशिवैः सशुक्रै**
> **र्वारे सितस्य च गृहं धनधान्यदं स्यात्[13] ।।**

पुष्यः, ध्रुवः = ध्रुवसंज्ञकानि उत्तरात्रयरोहिणीभानि, इन्दुः = मृगशीर्षः, हरिः = श्रवणम्, सर्पः = आश्लेषा, जलम् = पूर्वाषाढ़ा, एभिर्नक्षत्रैः सजीवैः = गुरूणा युतैः, तद्वासरेण = गुरूवासरेण च, कृतं = निर्मितं गृहं सुतराज्यदं = पुत्र राज्यं च ददाति ।

द्वीशः = विशाखा, अश्विः = अश्विनी, तक्षः = चित्रा, वसुः = धनिष्ठा, पाशिः = शततारकाः, शिवः = आर्द्रा एभिर्नक्षत्रैः, सशुक्रैः शुक्रेण युतैः, सितस्य वारे = शुक्रवासरे, च कृतं = निर्मितं गृहं, धनधान्यदं,स्यात् = भवति ।

**गृहप्रवेशमुहूर्तः –**

> **सौम्यायने ज्येष्ठतपोऽन्त्यमाधवे ।**
> **यात्रानिवृत्तौ नृपतेर्नवे गृहे ।।**
> **स्याद्वेषनं द्वाःस्थमृदुध्रुवोडुभि ।**
> **जन्मर्क्षलग्नोपचयोदये स्थिरे[14] ।।**

उत्तरायणे मकरार्कात् मिथुनार्कं यावत् ज्येष्ठमासः, माघमासः, फाल्गुनमासः, वैशाखमासः, एषु मासेषु गृहस्य द्वारदिशि स्थितेषु नक्षत्रेषु मृगान्त्यचित्रानुराधाउत्तरात्रयरोहिणी नक्षत्रेषु च जन्मराशिः जन्मलग्नम् आभ्यां उपचय (त्रिषडेकादशदशभवनोपगते लग्नोदये), स्थिरे (स्थिर लग्नोदये च ), नृपतेः = राज्ञः, यात्रानिवृत्तौ नूतननिर्मिते गृहे च प्रवेशनं भवति ।

**सन्दर्भ ग्रन्थाः–**


1. रूद्राष्टाध्यायी – पंचमोऽध्यायः, एकोनचत्वारिंशत मन्त्रः
2. मत्स्यपुराणे – अ0 252
3. भविष्यपुराणः – मध्यमपर्वः, अ0 14
4. मत्स्यपुराणः –भवननिर्माणाध्यायः
5. वृहद्वास्तुमाला – टीकाकारः, हरिशंकरपाठकः, श्लोक संख्या – 123,124,125
6. वृहद्वास्तुमाला – हरिशंकरपाठकः, श्लोक संख्या – 4
7. वृहद्वास्तुमाला – हरिशंकरपाठकः, श्लोक संख्या – 5
8. वृहद्वास्तुमाला – हरिशंकरपाठकः, लोक संख्या – 17
9. वास्तुरत्नाकरः – भूपरिग्रहप्रकरणम् , श्लोक संख्या – 23
10. मुहूर्तचिन्तामणि – वास्तुप्रकरण, श्लोक संख्या – 3,4
11. मुहूर्तचिन्तामणि – वास्तुप्रकरण, श्लोक संख्या – 10
12. मुहूर्तचिन्तामणि – वास्तुप्रकरण, श्लोक संख्या – 18
13. मुहूर्तचिन्तामणि – वास्तुप्रकरण, श्लोक संख्या – 26
14. मुहूर्तचिन्तामणि – गृहप्रवेशप्रकरण, श्लोक संख्या – 1